Acknowledgement

# आत्मनिवेदनम्

अध्यात्मजगति "**दर्शन**" इति शब्दः सम्यग् परिश्रुतस्तथापि दर्शनगलितार्थविज्ञानं नहि सर्वसुलभम्। स्वानुभूते अभिव्यक्तिरूपेणाविश्चक्रुः आचार्याः नानानामधेयं दर्शनम्। वेदमधिकृत्याविष्कृतं दर्शनमास्तिकदर्शनमिति समेषां सम्मतिः। वेदविरुद्धदर्शनं नास्तिकमिति न सन्देहावसरः।

प्रस्थानत्रयीमधिकृत्याध्यात्मजगति आशङ्करादाचार्याणां दर्शने प्रवृत्तिः। तैस्तै आचार्यप्रवरैः स्वसिद्धान्तानुसारं दर्शनं व्याख्यातम्। तदनुयायीनां नहि तत्त्वान्वेषणायाऽपि तु स्वमतचिख्यापयिषया वा पुपोषयिषया दर्शने प्रवृत्तिरित्यपि सत्यम्। किन्तु वस्तुतत्वाऽन्वेषकरूपेण दर्शनजगति प्रविश्योपदिष्टं "**श्रीस्वामिनारायणदर्शनम्**" भगवता श्री स्वामिनारायणेन।

बाल्यकालस्य महति प्रत्यूषेऽहं श्रीस्वामिनारायणसम्प्रदाये दीक्षितोऽभुवमपाठिषञ्चैतद् दर्शनविषयान्नैकान् ग्रन्थान्। अतो बाल्यकालादेव सम्प्रदायस्यास्य तत्त्वविवेचनविषयिणि समुत्कण्ठा ममान्तःकरणे विजजृम्भे। अहमुपर्युक्तस्य विश्वविद्यालयस्य संस्कृतविभाग आचार्यपरीक्षां विशेषयोग्यतया सहोत्तीर्णोऽभुवम्। तत्पूर्वं श्रीसम्पूर्णानन्दसंस्कृतमहाविद्यालयतः व्याकरणशास्त्रमेवाध्येष्म शास्त्रीपर्यन्तम्। किन्त्वाचार्यपरीक्षा मया रामानुजवेदान्तमेवाश्रित्य समुत्तीर्णा। अध्ययनसमकालमेव ममेच्छा श्री स्वामिनारायणदर्शने स्वीकृतानां तत्त्वानां स्वरूपरूपगुणभेदादिविवेचनविषयिणि तीव्रा समभवत्। आचार्यपरीक्षाऽनन्तरमनन्तश्रीविभूषितैः **गुरुजनैः स्वनामधन्यैः विविधविद्याविद्योतितान्तकरणैः शास्त्रीमहाभागैः श्रीघनश्यामप्रकाशदासजी स्वामी पादैः** साकं काले काले विचारचर्चापि प्राचलत।

विदुषां गुरुजनानामुपसेवनान्मयेदमपि ज्ञातं यत् संसारदवदग्धानां जीवानां सकलकलुषसंहरणसमर्थैः भवभयाभितप्तजनभागधेयभावितावतरणैः, समेषां भगवदवताराणामवतारिस्वरूपैः कलितमायामनुषतनुभिर्भगवद्भिः श्री स्वामिनारायणैः श्री सहजानंदाऽपराभिधानैः प्रवर्तितमिदं दर्शनम्। सम्प्रति सम्प्रदायोऽयं नानाशाखासु प्रथितस्तथापि मयात्र मूलमधिकृत्य केवलं तत्त्वविवेचनमेव कृतमस्ति, दर्शनविकासपरम्परोल्लेखपूर्वकम्।

नास्ति तिरोहितमिदं यत्सम्प्रदायस्यास्य सकलाः मान्यताः वैदिक्यः सन्ति।

रहस्यग्रन्थास्त्वस्य सम्प्रदायस्य "वचनामृतम्" श्रीहरिवाक्यसुधासिन्धुः" इत्यादिकाः वर्तन्ते। दर्शनमिदं श्री रामानुजमतानुकरणमेवेति सत्यादपेतम्।

**तत्त्वत्रयेष्वेतेषामीश्वरब्रह्मणां तत्त्वानामन्तर्भावकरणे सति जीवेश्वर-ब्रह्मपरब्रह्मणां स्वरूपस्वभावादिकानां ज्ञाने भ्रान्तयो भवन्तीति । तन्निराकर्तुमेव श्री स्वामिनारायणसम्प्रदाये पञ्चतत्त्वानि स्वीक्रियन्ते ।**

यथा तन्तुषु वस्त्रान्तर्भूतं, यथा बीजे वृक्षः यथा चाव्यक्ते जगदिदं तथा शास्त्रेषु दर्शनमिदं दर्शं दर्शं दर्शितमिति न वक्तुं शक्यते, तथापि बीजरूपेणासीदेव। यद्बीजं तदेव भगवता श्री स्वामिनारायणेनाविष्कृतं चिन्तनजलसिञ्चनेन । यद्वा कच्छपी स्वसूतान् दृष्टिमात्रेण पुष्णाति तद्वदिदं दर्शनं पुष्टिमाप भगवतः श्री स्वामिनारायणस्य पुरस्ताद् तेषामनुकम्पयेति न सन्देहावसरः । अत्रोपश्लोकितं तत्त्वपञ्चकनिर्णयात्मकं दर्शनम् । यथा षट्पाद् सर्वेभ्यः सुमनेभ्यः सारमादत्ते तथैवात्र सर्वेभ्यः दर्शनेभ्यः सारं संगृह्य मधुरूपमिदं दर्शनमाविष्कृतमित्यपि नात्मश्लाघा । उपनिषद्निगूढानि जीवेशमायाब्रह्मपरब्रह्मतत्त्वानि नः नः पूर्वाचार्याः प्राचीकशन । परमरूपेण साकं तत्त्वे निनिर्णिषुणामयमधिकमुपकृतं करोति । अप्रतिपत्तेरन्यथाप्रतिपत्तेश्च निरसनायावश्यमादरणीयमिदं दर्शनम् ।

समेषु दर्शनेषु जिज्ञास्यतया प्रतिज्ञातस्य-प्रतिपाद्यस्य वात्र तर्कानुगृहीतश्रुतिस्मृतिभ्यां सहानुभूत्या समर्थनम् ।

वस्तुतः सिद्धान्तोऽयं पूर्णरूपेण वैदिकोऽस्तीति प्रतिपादनाय ममायं लघुयत्नो विदुषामग्रे । दर्शनमिदं गुर्जरग्रन्थैस्तु समृद्धमेवास्ति । अस्ति च नानाग्रन्थाः गिर्वाणगिरायामपि तथापि यत्र यत्र काठिन्यमनुभूतं तत्र तत्र नैकविधमविस्मरणीयं सहाय्यमकार्षुः स्वनामधन्याः **दर्शनदक्षाः निर्देशकाः डॉ. श्रीहरिप्रसादमहाभागाः ।** तेषां निदर्शनानुसारेण मया श्री स्वामिनारायणदर्शनाभिमततत्त्वनिरूपणं कृतमस्ति । पुनश्चात्र निवृत्तप्राचार्यैः साकेतस्थैः श्रीशिवप्रसादमहाभागैरपि निर्दिष्टोऽयं पुनः पुनस्तदर्थं तेषामपि कृतज्ञोऽहम् । यावदपेक्षितं तावत्सहाय्यमासं श्रीमतां संस्कृत महाविद्यालयस्य प्राचार्याणां (एम.एस.युनिवर्सिटी-वडोदरा) श्रीयोगेशभाइ ओझा महाभागानाम् । स्वदर्शनदक्षाः शा. स्वामी सुव्रतवल्लभदासाः स्वसूचनैर्मां कृतार्थीचकार । डॉ. आर.टी. सावलिया-अहमदाबाद, डॉ.नीलाम्बर प्रभाकर देवता-बडौदा, डॉ. राजेन्द्र चोटलिया, संस्कृतभवनम्-राजकोट, एतेषामाभारं पुनः पुनः प्रदर्शयामि ।

परितापविषयोऽयं नास्मदीयानां साम्प्रदायिकानां विदूषां दर्शनोत्कर्षाय प्रवृत्तिः । नैकाधिकग्रन्थानां तत्त्वमीमांसया दर्शनप्रदर्शनं शक्यते विदूषां पुरस्तात् । कस्माद्धेतोः सारस्वता अप्यैतत् कार्यं न चक्रुरिति मे महदाश्चर्यम् । नितान्तमावश्यकं कार्यमिदमिति न सन्देहावसरः, येन दर्शनजगति साङ्गोपाङ्गं श्री स्वामिनारायण दर्शनस्यालोको भवेत् । दर्शनालोकवितानाय ममायं विनम्रः प्रयत्नः शोधग्रन्थरुपेण ।

शोधप्रबन्धेऽस्मिन् मल्लिनाथकृता प्रतिज्ञा ''**नामूलं लिख्यते किञ्चिन् न च मूलमुपेक्ष्यते** '' चरितार्था भवेदिति गुरुणामनुशासनम् । अन्यच्च सिद्धसरस्वतीन: मनीषिण: दुरुहया गिरया व्यवहरन्ति लिखन्ति चेति नाविज्ञातम् तत्रापि वेदान्तग्रन्थेषु बाहूल्येन काठिन्यं दरीदृश्यते । अत्र शोधप्रबन्धे यथाशक्ति सरलया बोधगम्यया गिरया लेखनाय यत्नो मदीय: । यत्नेऽस्मिन् कियद् साफल्यमिति पाठकविद्वांस एव वक्ष्यन्ति ।

यद्यपि कार्यमिदं मया यावच्छक्यं तावदस्ति कृतं समीचीनं तथापि ''**गच्छत: स्खलनं क्वापि** भवत्येवेतिरीत्या क्षतीनां लाभे विद्वांस: समीकरिष्यन्तीति मदीयहृत्पद्मे विस्रम्भ: । ममानेन यत्नेन विद्वांसस्तुष्टा: भविष्यन्ति यदा तदा मम यत्नो सफलीभविष्यन्तीति ।

विदुषां वशंवद:
स्वामी सन्तवल्लभदास: